- Title – मेघदूत टीका
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 5×2 =10
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning – यो: सुभग: सुन्दरस्तं - - -
- End – इति निबोधीत ।
- Colophon-
- Illustrations -
- Source -
- Subject - साहित्य
- Revisor -
- Author - अज्ञात
- Remarks- अपूर्ण

Sonam

तै ४

मे०टि० योः सुभगः सुंदरस्तं [illegible]भूताः बलाकाः आबद्धा रचिता कृता माला पंक्तिर्याभिस्ताः ॥ या
॥पु॥ काचन स्त्री पतिव्रता तेषां कंठे मालां ऽर्पयति इति भावः ॥ बाद्धितीयोर्थः ॥ याकाच
न स्त्री कंचन पतिं हृष्टा कंठे मालां धारयति ॥ तद्वत् स्त्रीभावो व्यंग्यः ॥ तत्रापिताः
व४ मेविष्यंते ॥ इति सेनकृया यां तासां कत्वेन विपरीतरतं व्यंग्यं ॥ तथापिरतेः इतिऽनेन विजनत्वं उ
द्दीपनभावः कथितः ॥ कस्मात् आबद्धमालाः [illegible] गर्भाधानक्षणपरिचयात् ॥ गर्भस्य
आधानं धारणं तं स्य आधानस्य क्षणः उत्सवः तस्य उत्सवस्य परिचयः अभ्यासः तस्मात् ॥ ब
॥द्धमालाः बलाकाः गर्भपुष्टिं कुर्वंति इति वाक्यात् ॥ कथं सेविष्यंते बलाकाः तत्राह पप
वनः मंदं मंदं शनैःशनैः त्वां नुदति प्रेरयति ॥ कीदृशः पवनः अनुकूलः ॥ पश्चानुगा
मी यथा येन प्रकारेण अयं चातकः वामः सेनूवाम पार्श्वस्थः सन् मधुरं सुस्वरं नदति श
ब्दं करोति चातकः किं कर्त्तुमिच्छुः तोयं गृध्नुः तोयं जलं गृहीतुमिच्छुः तोयगृध्नुः बलाके
वकपङ्क्तिःस्यात् बलाका विशकंठिका बलाका कामुकी प्रोक्ता बलाका चबकोमतः इत्यम
रः ॥ ९ ॥ मूल ॥ तां चावश्यं दिवसगणनातत्परामेकपत्नीमव्यापन्नामविहतगति राम
॥पू॥

स्त्रियः पथिभवाः पथिकाः तेषां वनिताः प्रेक्षिष्यंते अवलोकयिष्यंते कथंभूताः पथिकव
निताः उद्गृहीतालकांताः उत् ऊर्द्ध्वं गृहीताः अलकानां केशानां अंताः प्रांता याभिस्ताः पुनः
कथंभूताः पथिकवनिताः प्रत्ययात् प्रतीतेः आश्वसंत्यः विश्वासं कुर्वंत्यः आश्वसंतीति
आश्वसंत्यः प्रत्ययं दर्शयति यदा कदाचित् अस्मत्पतिः देशांतरं गच्छति तदा अस्मिन्ने
वसमये समापातीति प्रत्ययः तस्मात् प्रत्ययात् हेतुभूतात् कुतोयं निश्चितः तत्राह भो
मेघ त्वयि संनद्धे निकटवर्त्तिनि सति कः पुरुषः जायां भार्यां उपेक्षेत त्यजेत् अपितु
न कोपि कीदृशां जायां विरहविधुरां विरहेण विधुरा पीडिता तां विरहिण्याः लक्षणां अत
एव संपमितकेशत्वात् विरहिणीं भो मेघ यः जनः पराधीनवृत्तिः पराधीना परायत्ता
वृत्तिर्यस्य सोपि अन्योपि अहमिव न स्यात् ॥ अत्र व्यतिरेकोऽलंकारः ॥ ८ ॥ मूल ॥ मं
दं मंदं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्तोयगृध्नुः ॥
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः सेविष्यंते नयनसुभगं खे भवंतं बलाकाः ॥
९ ॥ टीका ॥ शकुनकथनेन प्रोत्साहयन्नाह ॥ भो मेघ भवंतं त्वां खे आकाशे बलाकाः विस
कंठिकाः केवयाः सितः ॥ सेविष्यंते पर्युपासयिष्यंति कथंभूतं त्वां नयनसुभगं नयन

कुतोयं अर्थः भावी ज्ञातुं शक्यः २

न्नाहले जलदः दशार्णाः देशविशेषाः कतिपयदिनस्थायिहंसाः तेतत्र संपत्स्य 3
मे०टी० ते संभविष्यंते कतिपयदिनानि स्थायिनो स्थातुशीला येषां इति स्थायिनः हंसा येषु
१४ ते तथा उक्ताः दशार्णाः किंभूताः दशार्णाः गृहबलिभुजां गृहबलिं भुंजंति
२२ ति गृहबलिभुजः तेषां गृहबलिभुजां काकानां चटकानां वा नीडारंभैः
नीडस्य आरंभैः गृहैः आकुलग्रामचैत्याः आकुला व्यस्ता व्यस्ता ग्रामाणां चै
त्याः पूज्यपादपा येषु ते ते तेषां पक्षिराणां स्वभावो यं वा अं ज्ञात्वा नीडारंभं कुर्वं
ति इति वर्षावर्णनं आपतनं ग्रामाश्रितदेवा अगारा वा ग्रामेषु चैत्याः पुनः ॥
किंभूताः दशार्णाः देशविशेषाः पांडुच्छायोपवनवृतयः पांडुच्छाया पीतकांति
र्येषां तथाभूता उपवनस्य वृत्तिर्वेष्टनं येषां ते केः केतकैः केतकीकुसुमैः किं १४
भूतैः केतकीकुसुमैः सूच्याग्रभिंकंटकेन भिन्नैः विदारितैः विकसितैः त्वयि
संपत्स्यंते त्वयि आसन्ने सति नीकटवर्तिनि सति पुनः किंभूता दशार्णाः
राम

कंठैःमयूरैःकिंभूतैःशुक्लापांगैःसजलनयनैःसजलानिनयनानियेषांतेतैःसंभवा ५
न्त्वंगंतुंआशुव्यवस्येतव्यवसायंकुर्यातकिंभोतोभवान्कथमपिकेनापिप्र
कारेणप्रत्युद्यातःप्रत्युद्गतःकृतप्रत्युद्गमनःकथंभूतस्यतेद्रुतंअपिमत्प्रियार्थंयि
यासोःममप्रियंमन्यमानंतद्दर्शिपिपासोःगंतुमिच्छोःकिंभूतेपर्वतेककुभसुरभौ
ककुभाःअर्जुनवृक्षाःतैःसुरभिःतस्मिन्अयंअर्थःसर्वदातवगिरौकालक्षे
परवसंभावितःतथापिकेकारूपस्वागतोपचारेणनिजप्रत्युद्गमनेनस
जलनयनार्घेणएवंमाघेनपूज्यपूजाविधानेनपूजितोभवान्अतःआशु
गंतुंउद्यमंकुर्यातइत्युक्तंवाक्यार्थेअनुमानाख्यालंकारः॥२४॥मूलं॥पांडु
च्छायोपवनवृतयःकेतकैःसूचिभिन्नैर्नीडारंभैर्गृहबलिभुजामाकुलग्राम
चैत्याःत्वय्यासन्नेपरिणतफलश्यामजंबूवनांताःसंपत्स्यंतेकतिपयदिनस्था
यिहंसादशार्णाः॥२५॥टीका॥पुनरपिमरणीयदेशावर्णनेनत्वंभोदंप्रलोभय

मेघटी० नकरूपंभूतंमूखंवमुभंगैःसहवर्तमानंसभ्रूभंगंकामुकस्यभावःकामु
१५ कत्वंतस्यअपंअभिप्रायःयोहिकामुकोभवतितस्याःकामिनतायाःकिंफल
गमनंतद्वतस्याःमुखाधरपानंकरोतिअतएवत्वदाद्युमुखमिवपयःपास्य
सिइदमेवकामुकत्वस्यफलंकामीलब्धाभुवतिकिंभूतंपयःचलोर्मि
चलाःचंचलाःऊर्मयःकल्लोलायत्रतत्पुनःकिंभूतंपयःतिरोपांतस्तनि
तसुभगंतिरोपांतेयतस्तनितंविहगानांकुजीतंतेनसुभगंयत्तत्पुनः
कांपंभूतंपयस्वादुमिवंअत्रउपमाअलंकारः॥२६॥मूल॥नीचैराख्यंगि
रिमधिवसेस्तत्रविश्रामहेतोस्त्वत्संपर्कात्पुलकितमिवप्रौढपुष्पैः
कदंवैःयःपण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणां॥उद्दामानिप्रथ १५
यतिशिलावेश्मभिर्यौवनानि॥२७॥टीका॥विश्रामोचितपर्वतोपदेशेन दे २
संभोदंप्रत्वेभयनाहभोजलदतत्रविदिशायांनगर्यांनीचैराख्यंगिरिं
राम
5

परिणातफलश्यामजंबुवनांताः परिणातानि परिपक्वानि यानि फलानि तैः श्या
माः कृष्णाः जंबुवनानां अंता येषु ते अनेन देशाः रम्यत्वं उदितं चैत्यं वौद्धायतने
क्षीवेग्रामा श्वत्वादिकेषु चतान् अनुमानाअलंकारः ॥२५॥ मूला तेषां दि
क्षु प्रथित विदिशालक्षणां राजधानीं गत्वा सद्यः फलमविकलं कामुकत्वं
कस्य लब्धा ति रोपां तस्तानि तसु भंगं पास्यसि स्वादु यत्तत्वं भ्रू भंगं मुखमी
व पयो वेत्रवत्याश्चलोर्मि। ऊर्मिरहिता टीका विदिशनगरि व्याजेन प्रलोभयन्नाह
तो मेघ वेत्रवत्याः नद्याः पयः जलं पास्यसि पानं करिष्यसि किं कृत्वा राज
धानिं गत्वा नृपनिवासनगरीं गत्वा किंभुतां राजधानीं तेषां दशार्णा
नां दिक्षु आशासु प्रथितः विदिशालक्षणां प्रथितं विख्यातं विदिशेति लक्षणां
नाम यस्याः सा तां पुनः किं कृत्वा सद्यः शीघ्रं कामुकत्वस्य अविकलं संपू
र्णां फलं लब्ध्वा जलं किमिव वेत्रवत्या न घातत प्रसिद्धं मुखमिव वदनमिव
व

मे॰ टी॰ २६

अवेणी॰ ॰॰ सं भूतं वेणीभूतं वेणीरूपाकारं ॰॰ तनुस्तोकं च त्नि न्धस्याः सा तथोक्ता वेणी
भूतेति वकेशपाशो बध्यते रूढं तीति रूढः ॰॰ उपधलक्षणः कः प्रत्ययः तरवो रूढाः रू
ढाधेतरवः तेभ्यो भ्रंशनी तितथोक्तैः जीर्णपर्णैः शुष्कपत्रैः पांडुच्छाया पांडुवर्णा अत एव हे सु
भग विरहावस्थया पूर्वोक्तप्रकारया कृशेन व्यतीतस्येतावतं कालमतीत्य गतस्य प्रोषितस्येत्य
र्थः तेन तव सौभाग्यं सुभगत्वं रूढ्यगसि ध्रुवे पूर्वपदस्य तु भयपदहृद्धिः व्यंजयंती प्रकाशयंती सख्य
लु सुभगा यदंगनाः कामयंत इति भावः सा पूर्वोक्ता सिंधुर्नदी निर्विंध्या स्त्रीनद्यां नाशदे सिंधुर्द
वेणीभूतप्रतनुसलिला सा व्यतीतस्य सिंधुः पांडुछाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः सौभा
ग्यं ते सुभग विरहावस्थया व्यंजयंती कार्श्यं येन त्यजति विधिना सत्वयैवोपपाद्यः ॥ ३०॥
शमदेवं धोगजरातिवेजयंती येन विधिना व्यापारेण कार्श्यं त्यजति स विधिस्त्वयैवोपपाद्यः
संपाद्यः कर्तव्य इत्यर्थः स विधिरेकत्र दृष्टिः अन्यत्र संभोगः तदभावनिबंधनत्वात्कार्श्यस्ति
भाव इयं पंचमी मदनावस्था इत्युक्तं च रतिरहस्ये नयनप्रीतिः प्रथमं चितासंगस्ततोथ संक रा॰ म॰
ल्पः निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः उन्मादो मूर्छा मृतिरित्येताः स्मरद २६
शा दशैव स्युरिति तामतीतस्येति पाठे सिंधुनामनदं इतरामिति व्याख्यातं सिंधुनाम न
दविशेषः काश्मीरदेशस्थितः नदी तु कुत्रापि नास्तीत्युपदामाव क्षुते॥ ३०॥

पथि उज्जयिनीपथे वीचीक्षोभे[illegible]णा तरंगचलनेन स्तनिता मुखरा कूजिताः विह
गानां हंसानां श्रेणिः पंक्तिरेव कांचीगुणो यस्यास्तस्याः स्खलितेनोपलस्खलितेन सुभ
गं यथा तथा संसर्पन्त्या गच्छन्त्यास्तथा दर्शिता प्रकटितावर्तो भंसाभ्रम एव नाभिर्यस्याः
स्तानस्याः स्यादावर्तोंभसां भ्रम इत्यमरः। निः क्रांता विंध्यान्निर्विंध्या नाम नदी निरादयः
क्रांताद्यर्थे पंचम्येति समासः द्विगुप्राप्तापन्नेत्यादिना परवल्लिंगता प्रतिषेधः तस्या
नद्याः सन्निपत्य संगत्य रसो जलमभ्यंतरे यस्य स रसाभ्यंतरः रसेनु श्रृंगारेणाभ्यंतरो भवा
नंतरंगो भव सर्वथा रसमनुभवेत्यर्थः श्रृंगारादौ जले वीर्ये सुवर्णे विषद्रुतक्रयोः इत्या

वीचीक्षोभस्तनितविहगश्रेणिकांचीगुणायाः संसर्पन्त्याः स्खलितसु
भगं दर्शितावर्तनाभेः निर्विन्ध्यायाः पथिभवरसाभ्यन्तरः सन्निपत्य स्त्रीणामाद्यंप्र
णयवचनं विभ्रमो हि प्रियेषु ॥२८॥

स्वादेव रसं ग्राह इति शब्दार्णवेन नु तस्याः अर्थनं अंतरेण कथं तत्र रसानुभवो युज्यत इ
त्यत आह स्त्रीणामिति स्त्रीणां प्रियेषु विभ्रमो विलासः एवाद्यं प्रणयवचनं प्रार्थनावाक्यं
हि स्त्रीणामयं स्वभावो यद्विलासैरेव र[illegible]नं न तु कंठत एवेति भावः विभ्रमस्त्वान्न
[illegible] ॥२८॥

मे॰टी॰ एवं शर्वोक्तप्रकारेण शरवाणां तृणानि शरो वाणस्तृणे वाण इति शब्दार्णवे तेषां वनं शरवणं प्रति रतः शरे ९
२५ स्विन्यादिना णत्वं तत्र भवो जन्म यस्य तं शरवणभवं देवं स्कंदं शरजन्मा षडानन इत्यमरः अवर्ज्यो व्यधि
करणो बहुव्रीहिर्जन्माद्युत्तरपद इति वामनः अगतिकत्वादाश्रयणीय इत्यर्थः आराध्योपास्य वीणाभिर्वी
णावद्भिः वीणादित्वादिभिः सिद्धद्वन्द्वैः सिद्धमिथुनैः भगवंतं स्कंदमुपवीणयितुमागतैरित्यर्थः जलक
णभयात् जलस्यैकस्य वीणाक्वणनप्रतिबंधकत्वादिति भावः मुक्तमार्गस्त्यक्तमार्गः सन् लंघिताध्वा

आराध्यैवं शरवणभवं देवमुल्लंघिताध्वा सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः व्या
लम्बेथाः सुरभितनयालम्भजां मानयिष्यन् स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम् ॥४८॥

किं च तमध्वानं गत्वेत्यर्थः सुरभितनयानां गवामालंभेन संज्ञपनेन जातं तथोक्तां भुवि लोके स्रोतोमू
र्त्या प्रवाहरूपेण परिणतां रूपविशेषमापन्नां रंतिदेवस्य दशपुरपतेर्महाराजस्य कीर्तिं चर्मण्वत्या
ख्यां नदीमित्यर्थः मानयिष्यन् सत्करिष्यन् व्यालंबेथाः व्यालंबावतरेरित्यर्थः पुरा किल रा राम॰
ज्ञो रंतिदेवस्य गवालंभेष्वेकत्र संभृतात् असृक्तनिस्यंदाच्चर्मराशेः काचिन्नदी सस्यंदे सा चर्मण्व २५
तीति प्रोच्यते ॥४८॥

ज्योतिषस्तेजसो लेखा राजयस्तासां वलयं मंडलं यस्यास्तीति लेखावलयि गलितं भ्रष्टं नतु लोल्यात्स्वप
च्छिन्नमित्याशयः यस्य मयूरस्य वर्हं पिछं पिछवर्हं नपुंसके इत्यमरः भवानी गौरी पुत्रप्रेम्णा सुतस्नेहेन कुवल
यस्य दलं पत्रं तत्प्रापि तद्योगि यथा तथा कर्णे करोति दलेन सह धारयतीत्यर्थः यद्वा दलप्रापि दलभाजि दलताडंके
कर्णे करोतीति किंवा नात्सन्नमीदलं परिहृत्य तत्स्थाने कर्णे वर्हं धत्त इत्यर्थः नाथस्तु कुवलयदलक्षेपीति पठति क्षेपो
निंदा परहरसंबंधेति हरशशिरुचा हरशिरस्थचंद्रिकया धौतापांगं स्वतोपि शुक्लादतिधवलितनेत्रांतं अपांगो नेत्रयोरं
॥ज्योतिर्लेखावलयि गलितं यस्य वर्हं भवानीपुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति॥धौतापांगं
हरशशिरुचा पावकेस्तं मयूरं पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥४८॥ ॥ ॥ ॥
तावित्यमरः पावकस्याग्नेरपत्यं पावकिः अत इञ् इति प्रत्ययः तस्य स्कंदस्य तं पूर्वोक्तं मयूरं पश्चात्पुष्पाभिषेच
नानंतरं अद्रेर्देवगिरेः कर्तृग्रहणेन गुहासंक्रमणेन गुरुभिः प्रतिध्वानमहद्भिः गर्जितैर्नर्तयेथाः नृत्यं कार
मार्दंगिकभावेन भगवंतं कुमारमुपासस्वेति भावः नर्तयेथा इत्यत्र णाणवकर्मकाच्चित्तवत्कर्तृकादित्यात्मने
पदापवादः निगरणचलनार्थेभ्यश्चेति परस्मैपदं न भवति न पादम्याङ्यमाङ्यसपरिमुहरुचनृत
वदवसः इति निषेधात् ॥४८॥